The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 3 Nov'25 - Jan'26 Home Page: www.tgjct.org Email: editor@tgjct.org ISSN: 3107-7528 (Online)

# वैदिकयुगस्य आधुनिकयुगस्य च शिक्षयोः तुलनात्मकमेकम् अध्ययनम्

*Sourav Seth*
*Ex. Student, Department of Sanskrit, Rabindra Bharati University, Kolkata*

**Abstract**

*वैदिककालस्य शिक्षाव्यवस्था मुख्यतः गुरुकुलाश्रमाधिष्ठिता आसीत्, यत्र विद्यार्थिभिः गुरुगृहे स्थित्वा एव विद्यार्जनं करणीयम् इति। तस्मिन् काले छात्राः गुरोः उपदेशं शिरसा गृहीत्वा कठोरतया सदाचारं कृत्वा च विद्यां प्राप्नुवन्ति स्म। आधुनिकशिक्षाव्यवस्थायां विशेषतया जातीयशिक्षानीतिमनुसृत्य विद्यार्थिनः गृहात् विद्यालयं प्रविश्य सारल्येन उच्चशिक्षां प्राप्तुं शक्यन्ते। अनेन शोधपत्रेण वैदिकयुगस्य आधुनिकयुगस्य च शिक्षयोः मध्ये कीदृशं वैसादृश्यं दृश्यते तस्मिन् विषये मया सविस्तारेण प्रदीयते। अत्र शिक्षायाः पद्धतिः, शिक्षकाणां प्रकाराः, शैक्षणिकस्य संस्थाः, उच्चशिक्षायाः विकासः, अनुसन्धानस्य उत्क्रान्तिः च इत्यादयः प्रमुखाः विषयाः अस्मिन् शोधपत्रे सरलतया मया उपस्थाप्यते।*

**Keywords:** *उपनयनसंस्कारः, विद्यारम्भः, ब्रह्मचारिन्, श्रमणः, समावर्तनम्, यौगनास्तिकः, सङ्गमः, चरकः, SWAYAM PRABHA, E-विद्वान्*

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥**
**ॐ शान्तिः शान्तिः शान्तिः॥**[i]

**उपोद्घातः**

वैदिककालस्य शिक्षाव्यवस्था मुख्यतया गुरुकुलकेन्द्रिता आसीत् यत्र छात्राः गुरुगृहात् एव शिक्षां प्राप्नुवन्ति स्म। दीर्घकालं वैदिकमन्त्रस्य अभ्यासोऽध्ययनञ्च कथनश्रवणपरम्परया प्रचलितम्। गुरोः मुखात् शिष्याः वचनं श्रुत्वा स्मृत्वा च मनसि वहन्ति स्म, इत्यस्मात् कारणात् इयं व्यवस्था **'श्रुतिपरम्परा' (oral Tradition)** इति नाम ज्ञायते। वैदिककाले त्रयाणां उच्चजातीयानां कृते शिक्षा अनिवार्यम् आसीत्। ब्राह्मणक्षत्रियवैश्यवर्णत्रयाणाम् उपनयनसंशोधनस्य अधिकारः आसीत्। अतः उपनयनसंस्कारं **द्वितीयं** जन्म, **"आध्यात्मिकजीवनस्य प्रारम्भः'** वा इतुच्यते।

व्युतपत्त्यानुसारेण **√शिक्ष्** धातुना सह **अकारागमे' टाप्'** प्रत्ययस्य योगेन **'शिक्षा'** इति पदं सिद्धम्। येन शास्त्रेण वेदमन्त्राणां शुद्धोच्चारणे सारल्यं साहाय्यं च भवति तत् शास्त्रं **'शिक्षाशास्त्रम्** इति कथ्यते। अर्थात् स्वरवर्णादीनाम् उच्चारणनियमबोधयित्री विद्या **शिक्षा** इत्यभिधीयते। कृष्णयजुर्वेदस्य तैत्तिरीय-उपनिषदि शिक्षायाः प्रथमोल्लेखः दृश्यते। अस्मिन् उपनिषदि प्रथमानुवाकस्य प्रथमाध्यायस्य नाम **'शीक्षावल्ली'** इति। शिक्षायाः स्वरूपविषये तत्र सविस्तारं वर्णितमस्ति—**"ॐ शीक्षां व्याख्यास्यामः, वर्णः स्वरः। मात्रा वलम्। सामः सन्तानः इत्युक्तः शीक्षाध्यायः।"** अत्र **'शीक्षा'** इत्यनेन वैदिकसाहित्ये अक्षराणां दीर्घता सूचिता। विषयेऽस्मिन् आदिगुरुणा शङ्कराचार्येण उक्तम्—**'शिक्षा शिक्ष्यतेऽनयेति वर्णाद्युच्चारणो लक्षणम्'**[ii] इति। एतया वर्णानाम् उच्चारणस्य विषये सम्यक् ज्ञानं प्राप्यते। तदर्थं सा **"शिक्षा"** इत्यनेन अभिधीयते।

शिक्षायाः स्वरूपविषये आचार्याणां भिन्नाः मताः अवलोकयितुं शक्यन्ते। अस्याः स्वरूपविषये स्वामिजिना उक्तम्— **'Education is the manifestation of the perfection already in man'**. विश्वकविना रवीन्द्रनाथेनापि कथितम्—**"The Highest Education is that which does not merely give us information but makes our life in harmony with all existence"**. गान्धीजिना उक्तम्— **'Education in the understanding of citizenship is a short term affair if we are honest and earnest'**.[iii] भाष्यकारेण शङ्कराचार्येण उक्तम्—**'शिक्षा शिक्ष्यतेऽनयेति वर्णाद्युच्चारणो-लक्षणम्'** इति। इतोऽपि शिक्षायाः स्वरूपविषये पाश्चात्यपण्डितेन विन्टरनितस्महोदयेण कथितम्—**" Siksa actually means instruction, then in particular instruction in reciting, i.e. in correct pronunciation, accentuation etc. of the samhita texts"**.[iv]


***All rights reserved. © 2025-2026***

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 3 Nov'25 - Jan'26 Home Page: www.tgjct.org Email: editor@tgjct.org ISSN: 3107-7528 (Online)

षट्सु वेदाङ्गेषु अन्यतमा शिक्षा। शिक्षा इति वेदपुरुषस्य नासिकारूपेण कल्पते। ऋग्वेदस्य शिक्षाग्रन्थरूपेण **पाणिनीयशिक्षायां** षडवेदाङ्गस्य परिचयप्रदानावसरे उल्लिखितमस्ति—**'शिक्षा घ्राणं तु वेदस्य'** इति।[v] नियमानुसारं वैदिकमन्त्राणां पाठस्य आवश्यकता वर्तते। तदर्थं शिक्षावेदाङ्गस्य आवश्यकता अस्ति। वैदिककाले शिष्याणां गुरुगृहात् एव वेदानाम् अध्ययनं कर्तव्यम् आसीत् । सम्पूर्णं छात्रजीवनं दीर्घयज्ञेषु व्यतीतव्यम् आसीत् ।

इदानीं भारतवर्षस्य आधुनिकस्य शिक्षाव्यवस्थायां वृहदाकारेण परिवर्तनं दृश्यते। आधुनिककाले **राष्ट्रियशिक्षानीतिः(NEP 2020)** समग्रस्य भारतवर्षस्य शिक्षासंरचनायाः अभूतपूर्वपरिवर्तनस्य प्रतिनिधित्वं करोति यत् देशस्य शिक्षाव्यवस्थाम् अधिकतया समावेशी नमनीयं सामग्रिकभावेन उत्कर्षतां संवर्धयति च। आधुनिकशिक्षाव्यवस्थायाः मूललक्षम् अस्ति प्रारम्भिकबाल्यशिक्षायाः परिचर्या-शिक्षायाः च सार्वभौमिकीकरणम् इति। अस्मिन् शोधपत्रे वैदिकशिक्षायाः आधुनिकशिक्षायाः च द्वयोः मध्ये उल्लिखितानि परिवर्तनानि मया अत्रोपस्थाप्यते।

**•शोधपत्रस्य उद्देश्यम्:**

कस्यापि ग्रन्थस्य रचनायाः निमित्तं तस्य प्रयोजनम् उद्देश्यं च भवतः एव। शास्त्रे उक्तम्—**'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'** इति। अस्य शोधपत्रस्य अपि एकम् उद्देश्यम् अस्ति। वैदिककालस्य अपि च आधुनिककालस्य शिक्षायाः स्वरूपं कथं भवति तस्मिन् विषये सरलतया अवबोधयितुं **"वैदिकयुगस्य आधुनिकयुगस्य च शिक्षयोः तुलनात्मकमेकम् अध्ययनम्"** इति नामकरणं मया गृह्यते। अनेन शोधपत्रेण इत्ययोः द्वयोः शिक्षापद्धतयोः विषये सारल्येण सम्यगतया ज्ञानं प्राप्तुं शक्यते इति।

१. वैदिकयुगे शिक्षापद्धतिः व्यक्तित्वविकासपरायणा आसीत्, आधुनिकयुगे तु व्यवसायपरत्वेन प्रवृत्ता अस्ति।
२. वैदिकशिक्षायां नैतिकमूल्यानाम् अधिकंमहत्वम् आसीत्, आधुनिकशिक्षायां तु तेषां ह्रासः दृश्यते।
३. वैदिकशिक्षा जीवनोपयोगिनी आसीत्, आधुनिकशिक्षा तु प्रमाणपत्रकेन्द्रिता।

**गवेषणा-पद्धतिः**

अस्मिन् शोधपत्रे वैदिकयुगस्य आधुनिकयुगस्य च द्वयोः शिक्षयोः मध्ये **'तुलनात्मक-पद्धतिः' (Comparative Method)** इत्यनेन मया विषय्यम् उपस्थापितम्।

**"वैदिककालस्य शिक्षाव्यवस्था"**

पुराकाले भारतवर्षे छात्राः पितुः वृत्तिम् अनुसरन्ति स्म। धार्मिकं व्यवसायिकं वा तस्मिन् विषये तेषां प्रशिक्षणं पितृगृहात् एव भवति स्म। शुक्लयजुर्वेदीयस्य शतपथब्राह्मणे अस्मिन् विषये सविस्तारेण उल्लिखिमस्ति यत्— ब्राह्मणक्षत्रियवैश्यानां त्रयाणाम् उच्चजातीयानाम् उपनयनसंशोधनस्य अधिकारः वर्तते । उपनयन-संस्कारादनन्तरं छात्राणाम् आध्यात्मिकजीवनं प्रारभ्यते। तज्जन्य छात्राः "**ब्रह्मचारिणः**" इत्युच्यन्ते।[vi] ततः छात्राणां वेदाध्ययनाधिकारः उत्पन्नः ।

**•वैदिकस्य शिक्षणस्य उद्देश्यम्:** – प्राचीनभारतस्य युवकानां युवतीनां च सामाजिक-आर्थिक-धार्मिकविकासाय उत्तमं प्रशिक्षणं प्रदातुं वैदिकशिक्षणस्य उद्देश्यम् आसीत्। अनेन संस्कृतेन संविधानेन चरित्रस्य व्यक्तित्वस्य च विकासः प्राचीनभारतस्य शिक्षायाः अन्यानि उद्देश्यानि आसन्।

**•वैदिकव्यवस्थायां शिक्षारम्भः :-** वैदिककाले बालकाणां पञ्चवर्षे एव शिक्षां प्रारभन्ते स्म । सरस्वत्यै देव्यै स्वरप्रदानेन शिक्षा आरब्धा । अयं संस्कारः **'विद्यारम्भः'** इति नाम्नः प्रसिद्धः। परन्तु उपनयनसंस्कारादनन्तरं छात्राः पितृगृहं त्यक्त्वा आश्रमं प्रविश्य अध्ययनस्य शुभारम्भं कृतवन्तः। ततः ते **'ब्रह्मचारिनः'** इत्यनेन अभिधीयते। अयं संस्कारः ब्राह्मणानां कृते अष्टवर्षे, क्षत्रियाणां कृते दशवर्षे, वैश्यानां कृते द्वादशवर्षे च आरब्धः । अतः दीक्षासंस्कारादनन्तरं शिष्याः गृहं परित्यज्य सद्गुरोः मार्गदर्शनस्य अधीने मठे गत्वा निवसन्ति स्म । ततः सः पीतवस्त्रं धारयन् **'श्रमणः'** इति नाम्नः कथ्यते।[vii] वैदिकशिक्षायां ब्रह्मचर्याश्रमस्य समापन्ते गृहस्थाश्रमं भवितुं सक्षमः अभवत्। किन्तु बौद्धशिक्षायाः समापन्ते शिष्यः **'श्रमणः'** इति पूर्णं देशपदं भिक्षुणा सह परिभ्रमति स्म । ते **'बौद्धभिक्षुः'** इति नाम्नः जगति परिभ्रमन्ति स्म।

**•अध्ययनस्य विषयाः** – वैदिकशिक्षाव्यवस्थायाम् अध्ययनस्य प्रमुखाः विषयाः आसन्- चत्वारि वेदाः, षट् वेदाङ्गानि, उपनिषदः, दर्शनानि, इतिहासः तर्कशास्त्रम् इत्यादयश्च। इतोऽपि धर्मशास्त्रं गणितशास्त्रं नीतिशास्त्रं शिल्पशास्त्रं धनुर्विद्या नाट्यकला इत्यादयश्च दृश्यन्ते। धर्मशास्त्रमधिकृत्य मनुना कृतम् **'मनुसंहिता'**, राजनीतिविषयमधिकृत्य महामतिकौटिल्यप्रणितम् **'अर्थशास्त्रम्'** इति सर्वजनविश्रुतः। तस्मिन् काले वृत्तिमूलकशिक्षा अपि प्रसिद्धा आसीत्। तन्मध्ये तन्तुवयनं, रज्जुविन्यासः, नौनिर्माणं, हस्तशिक्षणं, रत्ननिर्माणं, गन्धनिर्माणं च इत्यादयः प्राप्यन्ते।

**•अध्ययनपद्धतिः** – प्राचीनकाले भारते अनेकाः उच्चशिक्षणसंस्थाः, शिक्षणकेन्द्राणि च आसन् । प्राचीनभारते गुरु-शिष्ययोः मध्ये निकटसम्बन्धः आसीत्। सदैव गुरुः शिष्येभ्यः निकटे स्थित्वा ज्ञानं दत्तवान्। मौखिकतया ज्ञानमिदं प्रदानार्थं श्रवणमनननिदिध्यासनादिभिः उपायैः प्रचारितम्। विविधाः अध्ययनपद्धतयः प्रचलिताः आसन्। तेषां **'स्मरणम्'** इति प्रथमा अवस्था आसीत्। अस्याम् अवस्थायां विद्यार्थिनः पवित्रग्रन्थं कण्ठस्थं कर्तुं प्रयत्नं कृतवन्तः। **'समालोचना'** इति द्वितीयावस्था आसीत्। समालोचनाय एव श्रीरामाणुजाचार्यः श्रीमध्वाचार्यश्च स्वगुरुभ्यः भेदं दर्शयामासतुः- ब्रह्मसूत्रस्य व्याख्यायां यत् भाष्यकारेण शङ्कराचार्येण रचितमासीत्, तयोः तस्मात् भिन्ना स्वीयव्याख्या निर्मिता।

Published By: Atasi Publisher
All rights reserved. © 2025-2026

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 3 Nov'25 - Jan'26 Home Page: www.tgjct.org Email: editor@tgjct.org ISSN: 3107-7528 (Online)

**अन्तर्दर्शनम्(Introspection)- श्रवणं**(श्रोतुम्), **मननं**(चिन्तनम्), **निदिध्यासनं**(निरन्तरध्यानम्) च एतेन सत्यस्य साक्षात्कारः साध्यते। एषः उपायः ब्रह्मविद्यायाः (अद्वैतवेवान्तस्य) अध्ययनार्थं प्रयुज्यते।

**कथा पद्धतिः(Story telling)** – उत्तमरूपेण शिक्षणाय आचार्यः शिष्येभ्यः कथापद्धतिम् उपयुङ्क्ते स्म। अनेन उपायेन भगवान् बुद्धः अपि स्वदुपदेशेषु दृष्टान्तैः शिक्षयामासः।

**प्रश्नोत्तरपद्धतिः(Question And Answer Method) -** अनेन उपायेन शिष्याः आचार्येभ्यः प्रश्नान् पृच्छन्ति स्म। आचार्यः तान् विषयान् विस्तरेण चर्चयित्वा तेषां संशयान् निराकरोति स्म। आधुनिककाले एव अयं पद्धतिः प्रचलति।

**प्रायोगिकपद्धतिः(Hands on Method) -** व्यवहारिके तथा प्रयोग-विषयेषु यथा चिकित्साविज्ञाने शिष्याः प्रत्यक्षेण निरीक्षणेन च अभ्यासेन ज्ञानं प्राप्नुवन्तः ।

**संवादाः(Seminars)–** विद्यार्थिनः वादविवादैः चर्चाभिः च ज्ञानं प्राप्नुवन्ति स्म, ये नियतकालान्तराले आयोजिताः आसन् एषः उपायः आधुनिककालेऽपि शिक्षायाः संस्थाने प्रायेण प्रचलति इति।

**अध्ययनकालः(Periods of Study) -** तस्मिन् समये एकस्य वेदस्य सम्यक् अध्ययनार्थं द्वादश वर्षाणि यावत् समयः अभवत् । अस्य कृते चतुर्विंशतितः अष्टचत्वारिंशत् वर्षाणि यावत् समयः स्यात् ।

**स्नातकः(Graduate)** – शिक्षायाः समापनान्ते छात्रान् **'स्नातकम्'** इति कथ्यन्ते स्म। दीक्षान्तसमारोहे **'समावर्तनम्'** इति अनुष्ठानं भवति स्म।

•**शिक्षकाणां प्रकारः** : वैदिककाले शिक्षकाणां विविधाः प्रकाराः दृश्यन्ते स्म। क्रमानुसारेण अत्र मया उपस्थाप्यते—

**आचार्यः(Acharya) -** यः शिक्षकः स्वशिष्येभ्यः वेदान् निःशुल्कं शिक्षयति स्म।

**उपाध्यायः(Upadhyaya)–** यः शिक्षां वृत्तिरूपेण गृहीतवान्, वेदानां वेदाङ्गानां च यत्किमपि प्रकारम् एव अध्यापयति स्म सः उपाध्यायः इति।

**चरकाः (Charakas)** – विद्वांसः प्रतिदेशं भ्रमन्तः परमं ज्ञानम् अन्वेषणं कुर्वन्तः, ते शिक्षकत्वेन सर्वथा न समर्थाः आसन्। तेषां ज्ञानं देशभ्रमणेन प्राप्तं ते सानन्दं सर्वेभ्यः दत्तवन्तः।

**गुरुः(Guru) -** यः गृहस्यजीवनम् आचरणञ्च स्वशिष्येभ्यः शिक्षां दत्वा जीविकोपार्जनं कुर्वन् स्वकुटुम्बस्य पालनं करोति स्म।

**यौगनास्तिकाः (Yaujanasatika)–** ते शिक्षकाः गाम्भीर्यवशात् विद्वत्तया प्रसिद्धाः आसन्। दूरदेशात् विद्यार्थिनः आगत्य तान् निकषा उपदेशग्रहणार्थं स्थितवन्तः।

**शिक्षकः:-** यः कलासु यथा नृत्यगीतादीनाम् अध्यापनं कृतवान् शिष्येभ्यः कलाप्रशिक्षणं दत्तवान् च सः एव शिक्षकः।

**कुलपतिः-** ये आचार्याः आवासिकशिक्षाप्रतिष्ठाने प्रायशः दशसहस्राणां छात्राणां आहारवासस्थानानां सम्यक् रूपेण व्ययभारं निर्वहन्ति स्म, तेषां कुलपतिः इत्यनेन अभिधीयते। यथा महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलनाटके शकुन्तलायाः पालितपिता ऋषिः कण्वः कुलपतिः आसीत्। कुलपतेः लक्षणमिदम्-[viii]

•**शैक्षणिकसंस्थाः (Education Institution)** – गुरुकुलम् इति गुरोः गृहमेव आसीत् यः स्थिरगृहस्थः। दीक्षासंस्कारात् अनन्तरं शिष्यः स्वस्य पितृगृहं परित्यज्य स्वगुरोः गृहे वसन् अध्ययनस्य समाप्तिं यावत् स्वाध्यायपरः भवति स्म । अनेन प्रकारेण प्राचीनभारते उच्चशिक्षायाः संस्थाः विराजन्ते स्म।

**परिषदः** इति क्षेत्रम् आसीत् यत्र अतीव पण्डिताः छात्राः दार्शनिकचर्चाभिः संवादैः च आत्मानं समृद्धं कृतवन्तः। **परिषदः** एकविंशतिब्राह्मणैः दार्शनिकैः धर्मज्ञैः च संयुक्ताः आसन्। प्रथमशताब्द्यां तु तामिलनगरे **सङ्गमः** नाम लघुसभा नियमितरूपेण समायोजिता अभवत्। यत्र विद्वांसः मिलित्वा तामिलभाषायाः साहित्यगुणं परिवर्धयन्ति स्म।

**गोष्ठी** इति आसीत् राष्ट्रियसम्मेलनम्। यत्र महाराज्ञेन आयोजिते विविधानां विद्यालयानां छात्राः मिलित्वा मतविनिमयं कुर्वन्ति स्म। अस्मिन् सम्मेलने मिथिलायाः राज्ञा जनकेन आयोजिते महापण्डितः याज्ञवल्क्यः सुवर्णश्रृङ्गिसमन्वितं सहस्रगवां विशेषं पुरष्कारं प्राप्तवान्।

**विद्यापीठम्** इति आध्यात्मिकस्य अध्ययनस्य संस्था आसीत् यत् श्रीशङ्कराचार्येण स्थापितम्। श्रृङ्गगिरौ, काञ्च्यां, द्वारकायां पुर्यां च एतादृशं पीठम् आसीत्। अस्मिन् विद्यापिठे एकः आचार्यः आसीत् यस्य प्रभावः सहस्रग्रामपर्यन्तं प्रसारितः । एषा संस्था प्राचीनभारते सर्वोच्चशिक्षायाः प्रतीकरूपेण गण्यते स्म।

**आश्रमाः** अपि शिक्षायाः केन्द्राणि आसन्। भारतवर्षस्य नानादिग्भ्यः छात्राः आगत्य महर्षीणां साधूनां च समीपे अध्ययनेन चर्चया च आत्मानं सम्बर्धयन्ति स्म। यथा भरद्वाजाश्रमे भरतः सौनकऋषिः नैमिषारण्ये कण्वऋषेः मालिनीनद्याः तटे आश्रमः आसीत्।

•**उच्चशिक्षायाः कृते प्रसिद्धाः शिक्षासंस्थाः** –

**'तक्षशीला'** इति प्राचीनशिक्षायाः मुख्यकेन्द्रम् आसीत् यस्य वर्तमानस्थितिरस्ति पाकिस्तानराष्ट्रे। अस्मात् केन्द्रात् प्रसिद्धः वैद्यः जीवकः विम्बिसारम् आरोग्यं कृतवान्।

**नालन्दा विश्वविद्यालयः** इति संस्कृतेः पीठस्थानम् अस्ति विशेषतया न्यायशास्त्रस्य प्राणकेन्द्रम् इति मन्यते।

**वाराणसी** इति धर्मशास्त्राध्ययनाय प्रसिद्धकेन्द्रम् आसीत्।

**विक्रमशीला** इति तन्त्रबौद्धधर्मस्य पीठस्थानम् आसीत्।


All rights reserved. © 2025-2026

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 3 Nov'25 - Jan'26 Home Page: www.tgjct.org Email: editor@tgjct.org ISSN: 3107-7528 (Online)

**'आधुनिकयुगस्य शिक्षाव्यवस्था'**

**'स्वातन्त्र्योत्तरभारते उच्चशिक्षायाः विकासः अनुसन्धानस्य च उत्क्रान्तिः'** भारतवर्षे उच्चशिक्षायाः व्यवस्था इहजगति तृतीयस्थानं प्राप्यते। चीनअमेरिकाप्रदेशात् अनन्तरं अस्याः स्थितिः वर्तते। **'विश्वविद्यालयअनुदानआयोगः'(University Grants Commission)** एव तृतीयस्तरस्य शिक्षायाः नियामकसंस्थानम् अस्ति यत् मानकान् निर्देशयति, शासनं परामर्शं च ददाति, केन्द्रराज्ययोः मध्ये समन्वयं करोति च। भारतवर्षस्य संविधानानुसारं शिक्षायाः **संयुक्तसूची(Concurrent List)** अन्तर्भुता अस्ति, प्रवेशसंख्या ६६ अन्तर्गते संघसूचौ निर्दिष्टा।

भारतवर्षस्य स्वातन्त्र्यप्राप्तेः अनन्तरं १९४७ तमे वर्षे भारतवर्षस्य प्रथमशिक्षामन्त्रिणा मौलाना अबुल् कलाम् आजाद् महोदयेन सर्वदेशीयशिक्षायाः सुदृढं क्रेन्द्रीयनियन्त्रणं कल्पितम्। तेन चतुःषष्ठीसंख्याकाः एकरूपशैक्षणिकव्यवस्था अभिप्रेताभूत्। भारतस्य स्वातन्त्र्यानन्तरं शिक्षामन्त्रालयेन उच्चशिक्षायां प्रगतिः आरब्धा यत्र डाः एस.पि.राधाकृष्णानः अध्यक्षतां वहन् आयोगं संस्थाप्य शिक्षाविषये प्रतिवेदनं दातुं नियुक्तः अभवत्।

उच्चशिक्षायाः मान्यताप्रदानकार्यं विश्वविद्यालय-अनुदान-आयोगेन संस्थापितैः द्वादशभिः स्वायत्तसंस्थाभिः अनुगम्यते। तस्मिन् काले भारतीयशिक्षा त्रिषु भागेषु विभज्यते।

- **प्राथमिक-शिक्षा (Primary Education)**
- **माध्यमिक-शिक्षा (Secondary Education)**
- **उच्चशिक्षा (Higher Education)**

राष्ट्रीयशैक्षिणिक-अनुसन्धानप्रशिक्षणपरिषद् (**National of Educational Research and Training- NCERT**)इति नियामकसंस्था भारतवर्षे शालाशिक्षायाः पाठ्यक्रमनिर्माणस्य परमसंस्था अस्ति। **राष्ट्रियशैक्षणिकयोजनाप्रशासनमहाविद्यालयः (National University of Educational Planning and Administration- NUEPA)** राष्ट्रियशिक्षापरिषद् तथा राष्ट्रियशिक्षकशिक्षापरिषद् (**National Council for Teacher Education- NCTE**) च शिक्षातन्त्रस्य नियमनार्थम् उत्तरदायिनौ स्तः। भारतसरकारेण १९६८ तमे वर्षे राष्ट्रियशिक्षानीतिः (**National Policy on Education- NPE**) निर्मितं, पुनः १९८६ तमे वर्षे परिस्कृतं च। तथा १९९२ तमे वर्षे क्रियायोजनया (**Programme of Action- POA**) दृढीकरणं कृतम् सर्वकारेण विविधनूतनकार्यक्रमाः आरब्धाः यथा— **DPEP(District Primary Education Programme)** SSA(**सर्वशिक्षा अभियानम्- सर्वेभ्यः शिक्षायाः उपक्रमः**) इत्यादयस्य नवोदयस्य विद्यालयसंस्थापनं च अन्यैः विशिष्टविद्यालयैः सह प्रतिजनपदं विद्यालयानां स्थापनं नारीशिक्षायाः उन्नतिः अन्तरविषयकानुसन्धानं मुक्तविश्वविद्यालयाणां स्थापनेन च सह प्रवर्तितम्।

•**आधुनिकयुगस्य उच्चशिक्षाविभागस्य भूमिका-** अधः उच्चशिक्षायाः केचन विषयाः मया संक्षेपेण आलोच्यन्ते—

१. **प्रवेशसंख्यायाः(Gross Enrolment Ratio)वृद्धिः सर्वेषु माध्यमेषु विस्तारेण प्रविष्टम्।**
२. **गुणवर्धनाय शैक्षणिकसुधारस्य च प्रवर्तनम्।**
३. **नूतनशैक्षणिकसंस्थानां स्थापना तथा विद्यमानसंस्थानानां क्षमताविस्तारस्य प्रवर्तनम्।**
४. **उच्चशिक्षायां तन्त्रज्ञानस्य उपयोगः प्रवर्तितः।**
५. **व्यवसायिकशिक्षायाः कौशलविकासस्य च प्रबोधनम्।**
६. **भारतीयभाषाणां विकासः शिक्षाक्षेत्रे अन्ताराष्ट्रियसहयोगस्य प्रवर्तनम्।**

•**आधुनिकयुगस्य उच्चशिक्षायाः केचन नियामकाः संस्थाः -**

१. **विश्वविद्यालय-अनुदान-आयोगः (University Grants Commission):** विश्वविद्यालय-अनुदान-आयोगः(UGC) इति वैधानिकसंस्था १९४६ तमे वर्षे संसदीयनियमेन (Act of Parliament) स्थापितम् । अस्य आयोगस्य उद्देश्यं विद्यापीठशिक्षायाः समन्वयः, निर्धारणं तथा मानकसंरक्षणम् च अस्ति। १९४८-४९ तयोः मध्ये डाःएस.पि.राधाकृष्णान् महोदयस्य अध्यक्षतया **'University Education Commission'**स्थापनम् अभवत्। यया उच्चशिक्षायाः स्थितिः विस्तारः च अनुशंसितः। विश्वविद्यालय-अनुदान-आयोगः मानवसंसाधनविकासमन्त्रालयस्य**(Ministry of Human Resource Development- MHRD)अधीने अस्ति।**

२. **मुदालियर आयोगः(Mudaliar Commission):** -इत्यस्य स्थापना भारतवर्षस्य माध्यमिकशिक्षायाः संवर्धनार्थं सत् १९४२ तमे वर्षे अभवत्। अस्य अध्यक्षः डा: ए. लक्षणस्वामी मुदालियर् आसीत्। अस्य आयोगस्य मुख्यानि लक्ष्याणि सन्ति— भारतवर्षस्य माध्यमिकशिक्षायाः गुणवृद्धिः, अस्याः शिक्षायाः स्थितिः सप्तवर्षाणि यावत् भवेत् (६-१२ श्रेणीपर्यन्तम्), विद्यार्थिनः स्वभावानुसारं विषय-चयनम्, नीतिशिक्षायाः कार्यानुभवः शरीरिकशिक्षा च अनिवार्याणि स्युः। अनेन भारतवर्षस्य शिक्षाव्यवस्थायां बृहदाकारेण परिवर्तनं दृश्यते।

३. **कोठारि आयोगः (Kothari Commission)** – भारतवर्षस्य शिक्षाव्यवस्थायाः सर्वाङ्गीनपरिवर्तनार्थं १९६४ तमे वर्षे अयं स्थापितः आसीत्। अस्य अध्यक्षः डा:डि.एस.कोठारि आसीत्। तस्मिन् काले कोठारि-आयोगेन शिक्षायाः सर्वस्तरीय-संवर्धनं दृश्यते। मुख्यतया **'१०+२+३'**–

Published By: Atasi Publisher
All rights reserved. © 2025-2026

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 3 Nov'25 - Jan'26 Home Page: www.tgjct.org Email: editor@tgjct.org ISSN: 3107-7528 (Online)

शिक्षापद्धतिः अनेन प्रतिष्ठिता। शिक्षायाः एकीकृतनीतिः देशव्यपिनी भवेत्। मातृभाषायाः प्राथमिकशिक्षायाम् उपयोजनम् इति मुख्यविशेषः आसीत्।

• **जातीय शिक्षानीतिः २०२०(National Education Policy 2020) :-** भारतवर्षे प्रायेण ३४ वर्षेभ्यः अनन्तरं नवीनशिक्षानीत्याः अवलम्बनं कृतम्। एषा नवा शिक्षानीतिः भारतवर्षस्य शिक्षायाः रूपान्तरकरणाय लक्ष्यं स्थापयति। एषा नीतिः २१ जुलाइ, २०२० तमे दिनाङ्के भारतसर्वकारेण उद्घोषिता आसीत्।[ix]

• **अस्याः प्रमुखाः विशेषताः(Main Features) : -**

**शैक्षिक-संरचना(Education Structures):**

- **नवीनं प्रारुपम्- ५+३+३+४ प्रणाली**
- **५ वर्षाणिः पूर्व प्राथमिकम् (बालवाटिका. ३ वर्षाणि)+कक्षा १-२.**
- **३ वर्षाणिः कक्षा ३-५.**
- **३ वर्षाणिः कक्षा ६-८.**
- **४ वर्षाणिः कक्षा ९-१२.**

**•मातृभाषा/क्षेत्रीयभाषायाः प्रोत्साहनम्—**कक्षा ५ पर्यन्तं मातृभाषया क्षेत्रीयभाषया वा पाठं दातुम् अनुशंसितम्।

**•बहु-विषयकदृष्टिः—** विद्यायाः विविधविषयेषु अध्ययनस्य अवसरः वृत्तिमूलकशिक्षा षष्ठकक्षायाम् आरभ्यते।

**•सामाजिक-भावनात्मक-शिक्षा—** नैतिकता योगः क्रीडा सङ्गीतं नृत्यं च पाठ्यक्रमे संयोजितम्।

**•उच्चशिक्षायाः आधारः—**Higher Education Commission of India- (HECI) स्थापनं, National Testing Agency (NTA)प्रवेशपरीक्षायाः समन्वयं च स्नातकपाठ्यक्रमे ३ वा ४ वर्षीयः विकल्पेन वा भवितुं शक्यते।

**•डिजिटल् शिक्षायाः प्रोत्साहनम्—**Online learning, e-content virtual labs इत्यादीणां विकाशः, शिक्षकेभ्यः उत्तमं प्रशिक्षणम्, ३-१८ वर्षपर्यन्तं शिक्षायाः सार्वत्रिकीकरणं भवति।

**•जातीयशिक्षानीतेः उद्देश्यम्—** भारतवर्षम् एकविंशशताब्दे ज्ञानमहाशक्तिरूपेण स्थापयितुं समतामूलकायाः गुणवत्तायुक्तायाः च शिक्षाव्यवस्थायाः निर्माणस्य कृते अस्याः शिक्षानीतेः मूललक्षम् अस्ति।

**•उच्चशिक्षायां डिजिटल्-प्रक्रियायाः प्रभावः—** मानवसंसाधनविकासमन्त्रालयेन राष्ट्रियशिक्षणसन्देशप्रतिविधिप्रवर्तनम् अभियानम्**(NMEICT)**नामकं कार्यक्रमः प्रवर्तते। अस्याभिप्रायः अत्युत्तमं शिक्षणं सुलभं कर्तुं सूचना तथा संचारप्रविधेः**(ICT)**उपयोगं कृत्वा ज्ञानस्य प्रसारं कर्तुम् इच्छति। एतेषां विविधानां योजनानां विवरणं संक्षेपेण मया प्रदीयते—

**'SWAYAM'** इत्यस्य मुख्यः उद्देश्यः शिक्षानीतेः त्रीणि मूलतत्त्वानि (सुलभता, समता, उत्कृष्टता) साधनियानि।

**'SWAYAM PRABHA'**द्वात्रिंशत् **DTH** शैक्षणिक-चैनेल उच्चस्तरीय शिक्षायाः प्रासाराय उपगृहेभ्यः माध्यमेन दिवानिशं संयोजितः।

**राष्ट्रिय डिजिटल पुस्तकालयः(NDL)**भारतवर्षस्य एका परियोजना अस्ति या शैक्षिकसामग्रीम् एकीकरोति संरक्षति च यथावश्यकं विद्यार्थिभ्यः वितरति।

**E-विद्वान्—** विद्वद्जनानां प्रोफाइल्स्, शोधपत्राणि, अनुसन्धान-परियोजनाः च संचिनोति वितरति वा। अतः उच्चशिक्षायाः प्रसारणाय जातीयशिक्षानीतेः आवश्यकता इति सर्वे मन्यन्ते।

**उपसंहारः**

वैदिककालस्य शिक्षाव्यवस्था मुख्यतः आश्रमकेन्द्रीता गुरुकुलकेन्द्रीता वा आसीत्। यत्र सर्वे छात्राः गुरुगृहे स्थित्वा एव विद्यार्जनं कृतवन्तः। परन्तु आधुनिकयुगस्य शिक्षाव्यवस्थायां विशेषतया जातीयशिक्षानीतिमनुसृत्य सर्वेषामपि उच्चशिक्षालाभार्थम् अधिकारः अस्ति। अधुना विद्यालाभार्थं छात्राः गुरुगृहे इति न आवश्यकम्। कुत्रापि वसन्तः ते विद्यार्जनं कर्तुं शक्नुवन्ति। अस्मिन् शोधपत्रे **'वैदिकयुगस्य आधुनिकयुगस्य च शिक्षयोः तुलनात्मकमेकम् अध्ययनम्'** इत्यनेन नामकरणेन द्वयोः शिक्षायोः मध्ये वैसादृश्यं धारणा च मया उपस्थापितम्। अस्मिन् पत्रे वैदिकशिक्षायाः अध्ययनपद्धतिः शैक्षणिकविषयाः शिक्षकाणां प्रकाराः आधुनिकयुगस्य जातीयशिक्षानीतेः उद्देश्यं प्रभावः इत्यादीनां परिचयं सविस्तरं मया आलोचितम्। तेन सह आधुनिकशिक्षाव्यवस्थायां जातीयशिक्षानीतेः कथम् आवश्यकता इति मया चर्चितम्। अनेन शोधपत्रेण वैदिकआधुनिकशिक्षयोर्मध्ये सम्यक् ज्ञानं प्राप्तुं शक्यते इति।


All rights reserved. © 2025-2026

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 3 Nov'25 - Jan'26 Home Page: www.tgjct.org Email: editor@tgjct.org ISSN: 3107-7528 (Online)

**Bibliography**

Das, M. B. (Ed.). (n.d.). *History of Indian literature (Vol. 3)* (M. Winternitz). Delhi–Varanasi–Patna.

Disha Publication. (n.d.). *NTA UGC NET Paper 1: Higher education system*.

Gambhirananda, Swami. (Ed.). (2015, October). *उपनिषद् ग्रन्थावली*. उद्बोधन कार्यालय.

Internet Archive. (n.d.). Retrieved from https://archive.org

Majumder, N. N. (1916). *History of education in ancient India*. Macmillan & Co. Ltd.

Ministry of Education, Government of India. (2020). *National education policy 2020*. https://www.education.gov.in

Sastri, K. L. (1927). *History of Vedic literature (In Sanskrit)*. R. Subrahmanya Vadhyar & Sons.

Vasu, Dr. Yogiraj. (2016). *वेदेर परिचयः*. संस्कृत बुक् डिपो.

Wikipedia. (n.d.). *Education in India*. Retrieved from https://en.wikipedia.org

Wikipedia. (n.d.). *Vedas*. Retrieved from https://en.wikipedia.org

Wikipedia. (n.d.). *Vedic literature*. Retrieved from https://en.wikipedia.org

**End Note**

---

[i]ईशोपनिषद् (स्वामी गम्भीरानन्द, p-2, 20th March,1962)

[ii]शाङ्करभाष्यम्- शिक्षायाः स्वरूपम्।

[iii]शिक्षायाः स्वरूपम्- Gandhiji's speech about Education – Google Wikipedia.

[iv] History of Indian Literature (HIL) Vol- 1 Page- 282.

[v]पाणिनीयशिक्षा- श्लोकः ४२.

[vi]शतपथब्राह्मणम् – (११-५-४-१२)

[vii]History of Vedic Literature – Wikipedia Source.

[viii]'मुनीणां दशसहस्रं योरन्नदानादिना। अध्यापयेद् भवेद् वापि सर्वेः कुलपतिः स्मृताः॥' - कुलपतेः लक्षणम्।

[ix]National Education Policy -2020 – Ministry of Education – Wikipedia.


All rights reserved. © 2025-2026